# अव्याजकरुणाकटाक्षि

## रागम्: सालङ्गनाट    ताळम्: त्रिपुट

*श्री मुत्तुस्वामि दीक्षित विरचिता*

पल्लवि

अव्याजकरुणाकटाक्षी अनिशं मामव कामाक्षि

समष्टिचरणम्

रव्यादिनवग्रहोदये रसालङ्गनाटकक्रिये
दिव्यालङ्कृताङ्गाश्रये दीनावनगुरुगुहप्रिये

मध्यमकाल सहित्यम्

सव्यापसव्यमार्गस्थे सदा नमस्ते शुकहस्ते

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇